## जम्भा सुहरिततृणसोमेभ्यः । (१२५/८६४)

बहुव्रीहौ समासे स्वादिभ्यः परं जम्भा इति कृतसमासान्तमुत्तरपदं निपात्यते । जम्भशब्दः [1]अभ्यवहार्य-वाची दन्तविशेषवाची [2]च । शोभनो जम्भः अस्य सुजम्भा देवदत्तः । [3]शोभनाभ्यवहार्यः शोभनदन्तो वा । एवं हरितजम्भा । तृणजम्भा । सोमजम्भा । [4]दन्तवचने – तृणमिव जम्भः अस्य, सोम इव जम्भः अस्य इति विग्र-हीतव्यम् । सुहरिततृणसोमेभ्यः इति किम् ? पतितजम्भः ॥

## दक्षिणेर्मा लुब्धयोगे । (१२६/८६५)

दक्षिणेर्मा इति कृतसमासान्तः[5] निपात्यते बहुव्रीहौ समासे लुब्धयोगे । दक्षिणम् ईर्मम् अस्य दक्षिणेर्मा मृगः । ईर्मम् व्रणमुच्यते । दक्षिणमङ्गं व्रणितम् [6]अस्य व्याधेन इत्यर्थः । लुब्धयोगे इति किम् ? दक्षिणेर्मं शकटम् ॥

## इच् कर्मव्यतिहारे । (१२७/८६६)

कर्मव्यतिहारे यो बहुव्रीहिः तस्माद् इच् प्रत्ययो भवति[7] । 'तत्र तेनेदमिति[8] सरूपे' (२.२.२७/८४६) इत्ययं बहुव्रीहिर्गृह्यते । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । कचाकचि । मुसलैश्च मुसलैश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुसलामुसलि[9] । दण्डादण्डि[10] । तिष्ठद्गुप्रभृतिषु (२.१.१७/६७१) अयम् [11]इच् प्रत्ययः पठ्यते ॥

## द्विदण्ड्यादिभ्यश्च । (१२८/८६७)

द्विदण्ड्यादयः शब्दाः इच् प्रत्ययान्ताः [12]साधवो भवन्ति । द्विदण्ड्यादिभ्यः इति तादर्थ्ये एषा चतुर्थी, न पञ्चमी । [13]द्विदण्ड्याद्यर्थमिच् [14]प्रत्ययो भवति । तथा भवति यथा द्विदण्ड्यादयः सिध्यन्ति इत्यर्थः । समुदाय-निपातनाच्चार्थविशेषेऽवरुध्यन्ते । द्विदण्डि [15]प्रहरति । द्विमुसलि [16]प्रहरति । इह न भवति, द्विदण्डा शाला इति ।

बहुव्रीह्यधिकारेऽपि तत्पुरुषात् क्वचिद् विधानमिच्छन्ति । निकुच्य कर्णौ धावति निकुच्यकर्णि धावति । प्रोह्य पादौ हस्तिनं वाहयति [17]प्रोह्यपादि हस्तिनं वाहयति । मयूरव्यंसकादित्वात् समासः ॥

द्विदण्डि[18] । द्विमुसलि । उभाञ्जलि । उभयाञ्जलि । उभाकर्णि । उभयाकर्णि । उभादन्ति । उभयादन्ति । उभाहस्ति । उभयाहस्ति । उभापाणि । उभयापाणि । उभाबाहु । उभयाबाहु । एकपदि । प्रोह्यपदि । आढ्यपदि । सपदि । निकुच्यकर्णि । संहतपुच्छि । उभाबाहु, उभयाबाहु इति निपातनाद् इच्-प्रत्ययलोपः । प्रत्ययलक्षणेनाव्ययीभावसञ्ज्ञा ॥

---

1. अभ्यवहारवाची ड, तदन्तविशेषवाची ह. 2. वा ब. क. ड. 3. शोभनाभ्यवहारः ड. 4. तदन्त-वचने क. 5. बहुव्रीहिः इत्यधिकम् फ. 6. अस्य नास्ति क. 7. समासान्तः इत्यधिकम् ग. फ. 8. इति सरूपे नास्ति ग. 9. हलैश्च हलैश्च प्रहृत्य इदं सुद्धं प्रवृत्तं हलाहलि इत्यधिकम् क. 10. युद्धं वर्तते इत्यधिकम् ग. 11. इच् नास्ति क, प्रत्ययः नास्ति ह. 12. निपात्यन्ते फ. 13. द्विदण्ड्यादिभ्यः क. ड. फ. 14. प्रत्ययः नास्ति क. 15–16. प्रहरणम् ब. ह. 17. प्रोह्यपदि क. ड. 18. त्रिदण्डि इत्यधिकम् क.